# ॥ श्रीभुजङ्गप्रयाताष्टकम् ॥

.. shrIbhujangaprayAtAShTakam ..

sanskritdocuments.org

August 20, 2017

# .. shrIbhujangaprayAtAShTakam ..

# ॥ श्रीभुजङ्गप्रयाताष्टकम् ॥

## Sanskrit Document Information

Text title : bhujangaprayAtAShTakam by Vitthaleshvara

File name : bhujangaprayAtAShTakamviTThaleshvara.itx

Category : aShTaka, vishhnu, krishna, bhujanga

Location : doc_vishhnu

Author : viThThaleshwara

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ श्रीभुजङ्गप्रयाताष्टकम् ॥

सुधाधामनैजाधराधारवेणुं कराग्रैरुदग्रैरतिव्यग्रशीलैः ।
सदा पूरयंश्चारयन्गोवरूथान्पुरः प्रादुरास्तां ममाभीरवीरः ॥ १॥

यशोदायशोदानदक्षाम्बुजाक्ष प्रतीपप्रमाद प्रहाणप्रवीण ।
निजापाङ्गसङ्गोद्भवानङ्गगोपाङ्गनापाङ्गनृत्याङ्गणीभूतदेह ॥ २॥

सदा राधिकाराधिकासाधकार्थं प्रतापप्रसादप्रभो कृष्णदेव ।
अनङ्गीकृतानङ्गसेव्यन्तरङ्ग प्रविष्टप्रतापाघहन्मे प्रसीद ॥ ३॥

रमाकान्त शान्त प्रतीपान्त मेऽतः स्थिरीभूतपादाम्बुजस्त्वं भवाशु ।
सदा कृष्णकृष्णेति नाम त्वदीयं विभो गृह्णतो हे यशोदाकिशोर ॥ ४॥

स्फुरद्रङ्गभूमिष्ठमञ्चोपविष्टोच्छलच्छत्रपक्षे भयञ्चानिनीषो ।
अलिव्रातजुष्टोत्तमस्त्रग्धर श्रीमनोमन्दिर त्वं हरे मे प्रसीद ॥ ५॥

स्वरस्मेर कस्मात्त्वमस्मान्स्वतो न स्मरस्यम्बुजस्मेरनेत्रनुकम्पिन् ।
स्मितोद्भावितानङ्गगोपाङ्गनाङ्गोल्लसत्स्वाङ्गसत्सङ्ग लम्भेश पाहि ॥ ६॥

रमाराम रामामनोहारिवेषोद्धतक्षोणिपालाघपापक्षयेश ।
दरोत्फुल्लपङ्केरुहस्मेरहासप्रपन्नार्तिहन्नन्दसूनो प्रसीद ॥ ७॥

कुरङ्गीदृशामङ्गसङ्गेन शश्वन्निजानन्ददानन्दकन्दातिकाल ।
कलिदोद्भवोद्भूतपङ्केरुहाक्ष स्वभक्तानुरक्ताक्तपाद प्रसाद ॥ ८॥

भुजङ्गप्रयाताष्टकेनानुयातो भुजङ्गे शयानं हरिं संस्तवीति ।
रतिस्तस्य कृष्णे भवत्याशु नित्या किमन्यैः फलैर्फल्गुभिः सेवकस्य ॥ ९॥

इति श्रीविठ्ठलेश्वररचितं भुजङ्गप्रयाताष्टकं सम्पूर्णम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIbhujangaprayAtAShTakam ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*